अङ्ग न० अम–गत्यादौ बा० गन् । चित्ते (अङ्गजः कामः) “हिरण्यगर्भाङ्गभुवमिति” देहे “हस्तेनस्पृष्ट तदङ्गमिन्द्र” इति कुमा० । अङ्गशब्दस्य चेष्टावदन्त्यावयविरूपावयविवाचित्वेऽपि तदवयवेऽपि हस्तपादादौ व्यवहारः अवयवत्वसामग्रात् तेषाञ्च प्रत्यङ्गशब्देनापि व्यवहारः । तत्राङ्गशब्दस्य देहार्थत्वे तदीयस्वरूपं तदवयवभेदाश्च सुश्रुते दर्शिताः । यथा “शुक्रशोणितं गर्भाशयस्थमात्मप्रकृतिविकारसंमूर्च्छितं गर्भ इत्युच्यते तञ्च चेतनावस्थितं वायुर्विभजति, तेज एनं पचति, आपः क्लेदयन्ति, पृथिवी संहन्त्याकाशं विवर्द्धयति । एवं विवर्द्धितः स यदा हस्तपादजिह्वाघ्राणकर्णनितम्बादिभिरङ्गैरुपेतस्तदा शरीरमिति संज्ञां लभते तच्च षडङ्गं शाखाश्चतस्रो, मध्यं पञ्चमं, षष्ठं शिर इति ।

“अतःपरं प्रत्यङ्गानि वक्ष्यन्ते । मस्तकोदरपृष्ठनाभिललाटनासाचिवुकवस्तिग्रीवा इत्येता एकैकाः । कर्णनेत्रनासाभ्रूशङ्खांसगण्डकक्षस्तनवृषपार्श्वस्फिग्जानु-बाहूरुप्रभृतयो द्वे द्वे, विंशतिरङ्गुलयः । स्रोतांसि च वक्ष्यमाणानि । एष प्रत्यङ्गविभाग उक्तः ॥ तस्य पुनःसङ्ख्यानम् । त्वचः कला धातवो मला दोषा यकृत्प्लीहानौ फुप्फुस उण्डुको हृदयमाशया अन्त्राणि वृक्कौ स्रोतांसि कण्डरा जालानि कूर्चा रज्जवः सेवन्यःसङ्घाताः सिमन्ता अस्थीनि सन्धयः स्नायवः पेश्यो मर्म्माणि शिरा धमन्यो योगवहानि स्रोतांसि च ॥

त्वचः सप्त । कलाः सप्त । आशयाः सप्त । धातवः सप्त । सप्त शिराशतानि । पञ्च पेशीशतानि । नव स्नायुशतानि । त्रीण्यस्थिशतानि । द्वे दशोत्तरे सन्धिशते । सप्तोत्तरं मर्मशतम् । चतुर्विंशतिर्धमन्यः । त्रयो दोषाः, त्रयो मलाः । नव स्रोतांसीति समासः इति” ॥

अवयवे “शेषाङ्गनिर्म्माणविधौ विधातुरिति” कुमा० । अपाङ्ग इति ।

उपाये, “सर्व्वकार्य्यशरीरेषु मुक्ताङ्गस्कन्धपञ्चकमिति” “मन्त्रो योधइवाधीरः सर्व्वाङ्गैः संवृतैरपीति” च माघः । प्रधानोपयोगिनि उपकरणे, “फलवत्सन्निधावफलं तदङ्गमिति” मीमांसा । “प्रधानस्याक्रिया यत्र साङ्गं तत् क्रियते पुनः तदङ्गस्याक्रियायान्त्विति” स्मृतिः । “हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयमिति” सम्बोधने अव्य० । “त्वमङ्ग यस्याः पतिरुज्झ तक्रम” इति नैषधम् । अङ्गमस्त्यस्य अच् । अङ्गवति “येनाङ्गविकार इति” पा० अङ्गस्याङ्गिन इत्यर्थः अन्तिके च त्रि० । जन्मादिलग्ने न० “अङ्गाधीशः स्वगेहे बुधगुरुकविभिः संयुतो वीक्षितो वेति” जातकम् । देशभेदे पु० । तस्य विवरणम् अङ्गाधिपशब्दे । “अङ्गेषु वङ्गेषु खसेषु योज्या” इति “अङ्गवङ्गखसेष्वेवेति” च ज्योतिषम् अङ्गानां राजा आङ्गः बह्वर्थे अङ्गाः । अङ्गदेशे भवः अण् । आङ्गः । बह्वर्थे अङ्गाः । अङ्गेन देहेन निर्वृत्तः ठक् । आङ्गिकः । अङ्गदेशस्तद्राजानो वा भक्तिरस्य अण् आङ्गः । अङ्गस्येदम् अङ्गीयः । “यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गमिति” पाणिनिपरिभाषिते प्रत्ययावधिभूते शब्दभेदे, “इणः षीध्वं लुङ्लिटां धोऽङ्गादिति” पा० । अङ्गादागतम् अण् । आङ्गः अङ्गनिमित्ते कार्य्ये “वर्णादाङ्गं बलीय इति” परिभा० । उपकरणानि च यथा यथमुदाहृतानि दिङ्मात्रमत्रोच्यते । तत्र “स्वाम्यमात्यसुहृत् कोषो राष्ट्रं दुर्गं बलानि च राज्याङ्गानीत्युक्तानि” “स्वाम्यमात्यौ पुरं राष्ट्रं कोषदण्डौ सुहृत्तथा । सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते” इत्युक्तानि राज्याङ्गानि । दर्शादौ च प्रयाजादीनि, वैदिककर्म्मणाञ्च तत्तत्क्रियाकलापाः तत्तद्द्रव्याणि चाङ्गानि “साङ्गाद्धि वैदिककर्मणः फलावश्यम्भाव इति” मीमा० । वेदस्य व्याकरणादीनि अङ्गानि, “शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसाञ्चितिः । ज्योतिषामयनञ्चैव वेदाङ्गानि षडेव तु इति” । एतेषाञ्च लक्षणादिकमग्रे वक्ष्यते । एतेषां वेदार्थज्ञानोपयोगित्वादङ्गत्वम् अतएव श्रुतौ “ब्राह्मणेन निष्कारणः षडङ्गः सरहस्योवेदोध्येतव्य” इत्युक्तम् शिक्षायां तेषां वेदार्थज्ञानोपयोगित्वादङ्गत्वं दर्शितम् यथा

“छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते । शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतं तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते इति” अतो वेदार्थज्ञानोपयोगितया एतेषां ग्रन्थानां वेदाङ्गत्वम् । “द्वे विद्ये वेदितव्ये” इत्युपक्रम्य “पराचापरा च तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोज्योतिषमिति सा परा ययाक्षरमधिगम्यते” इति श्रुतौ व्याकरणादीनामपरविद्यात्वेन कीर्त्तनं “तेषाञ्च साधनभूतधर्म्महेतुत्वात् षडङ्गसहितानां धर्म्मसाधनत्वेनापरविद्यात्वमिति” भाष्ये उक्तम् । आयुर्वेदादीनामुपवेदत्वं न्यायादीनामुपाङ्गत्वं यथा च तेषां तथात्वं तथा तत्तच्छब्दे दर्शयिष्यते ।